ISSN: 2583-5149 | Vol. 2, Issue. 1 | 2022 June | Frequency: Biannual

अभिनवधारा
ABHINAVDHARA
International Journal of Innovation in Indic Studies
www.ijiis-org.com

# वैदिक वर्णव्यवस्था एक सर्वेक्षण

सुषमा सरेनः
गवेषिका
सिधो कानहो विरशा विश्वविद्यालयः
पश्चिमवङ्गः

Received: 22 May 2022 | Accepted: 5 June 2022 | Published: 15 June 2022

**भूमिकाः**

जातिव्यवस्था भारते अनिर्वचनीय सामाजिकः विपदः अस्ति। भारतं सिन्धुनद्याः तटे निर्मितम् अस्ति। वेदिकसभ्यतायाः मुख्यमन्त्रः आसीत् अमृतवाणी अमृतस्य पुत्रः। विश्वसंस्कृतिः प्रत्येकं प्राणिनां अमृतं पुत्रं घोषयति। ब्रह्माण्डे प्रत्येकं जीवः अमृतस्य पुत्रः परिकीर्तितः। जातिप्रयुक्ताः सर्वे शब्दाः व्राह्मण क्षत्रिय वैश्य शूद्राः इति। वर्णः यत् विकल्पेन स्वीकुर्वितुं शक्यते। वर्णप्रथा शास्त्रेषु शब्दाः नास्ति तत्र वर्णाश्रम् जातित्वं वा। शब्दार्थविश्लषणं कृत्वा वर्णशब्दस्य धातुविज्ञानार्थः वृणोति इति द्रष्टुं शक्यते यस्य अर्थः चयनार्थः। **वर्णो वृणोतेः**[1]। काल परिवर्तनेन पुण्यमाश्रित जातिव्यवस्था जन्माधारिता अभवत्। **व्रतमिति कर्म्मनाम् वृणोतीति सतः**[2] अत्र व्रतम् शब्दः कर्मनाम। वृ-धातुना आवृतः अर्थं वोधयति। अतएव वैदिकधर्मः वर्णाश्रमधर्म उच्चते। एषः जातिव्यवस्था विषये चर्चाया विषयः।

**पर्यालोचनाः**

जातिव्यवस्था सामान्यतः व्राह्मण क्षत्रिय वैश्य शूद्रं निर्दिशति। अस्मिन् वर्णव्यवस्थायां भेदः नास्ति किन्तु सामञ्चस्यं लक्षते। यथा **रुचं नो धेहि व्राह्मणेषु रुचं राजसु नस्तृहि। रूचं विश्येषु शूद्रेषु मयि धेहि रूचा रुचम्। लक्ष्यते**[3]। **अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः**[4]। वर्णव्यवस्था गुणानुसारं कर्माणि निर्दिशति। केचन क्षात्रवल प्रशासनं केचन महायज्ञादि इष्टकर्म केचन वित्तीयव्यवस्थाः एवं भिन्नस्वभावानां गुणवन्ताः। स्वानुसारेण कर्माणि कर्तुं हे उषा नित्यं त्वं ज्योतिषा अन्धकारात् संसारं प्रबोधयति। वर्णाश्रमस्य सुन्दरं रुपरेखा उपलभ्यते यथा- **नानानां वा उन धियो वि व्रतानि जनानाम्**[5]**।**

व्राह्मणः

व्राह्मणस्य गुणाः विषये वेदे लक्ष्यते संवत्सरं तपः भवेयुः अवश्यं सौम्या शान्तः वैदिक नियमानानां कठोरतापूर्वकं पालनं अवश्य करणीयम्। नित्यं ध्यानं पूजा च कर्तव्य अर्थात्ब्राह्मणसो अतिरात्रे न सोमे सरो पुर्णमभितो वदन्तः संवत्सरस्य तदहः परिष्ठ। **अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहञ्चैव व्राह्मणानामकल्पयत्[6]।**

क्षत्रियः

क्षन्दति रक्षति जनान् क्षत्र।क्षरते हि स्वते नश्यते पदार्थो येन स क्षत्र। **क्षत्रं राजन्य[7] । क्षत्रस्य वा एतद्रुपं यद्** राजन्य[8]। क्षत्रियस्य गुणविषये उक्तम्- क्षत्रियः शूरः परोपकारी धनपालः कुशलः शासकः शत्रदमनश्च भवेत्। **प्रजानां रक्षणं दानमिज्याध्ययनमेव च। विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः[9]।**

वैश्यः

**वैश्यः विशः मनुष्यनाम्** यो यत्र तत्र व्यवहारविद्यासु प्रविशति सः वैश्यः। व्यवहार विद्या कुशलः जनो वा। वेदे वैश्यस्य कर्तव्य विषये उक्तम्- वैश्य व्यापारकेन्द्रानि आलस्यं कार्यं कर्तुं प्रोत्साहयिष्य दानेन निरप्रेक्षान् जागरिष्यति अर्थात् **इन्द्रमहं वणिजं चोदयामि स न ऐतु पुरएता यो अस्तु। नुदान्नरतिं परिपन्थितं मृगं स ईशानो धनदा अस्तु मह्याम्[10]**। । व्यापारे परधनसाञ्चयिनः असीमान् दण्डयिष्यति अर्थात् **पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च[11]।** पशुपालनं च विद्याधर्मस्य प्रचारप्रवर्धन प्रवर्धनयोः धनव्ययः अग्नियज्ञं कुरुत वेदानाम् अध्ययनम् सर्वविधव्यापारः वृद्ध्यर्थं वित्तपोषनम् एते वैश्यस्य गुनां कर्माणि च। अर्थात्

शूद्रः

शोचनीयाः शोच्यां स्थितिमापन्नो वा सेवायां साधुर अविद्यादि गुणसहितो मनुष्यो वा अर्थात् शूद्रः स एव यः अविद्यायाः कारणात् उन्नतिं न प्राप्नुयात्। यश्च हीनत्वात् स्वस्य उन्नतिं चिन्तयति सः भगवतः पोषणं मन्यते। **असतो वा एष सम्भूतो यत् शूद्रः[12]। एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् एतेषामेव वर्णनां शुश्रूषांमनसूयया[13]** अर्थात् ब्राह्मणक्षत्रियवैश्यानां निन्दां ईर्षा अवमानना च परित्यज्य सम्यक् सेवां कर्तुं शूद्रस्य कर्तव्यम्। एतदेव शूद्रस्य तेन जीवनं चरितुं एकमेव गुनं कर्म च।

**उपसंहारः**

उपयुक्तं चर्चां दृष्ट्वा वर्णव्यवस्था गुणवादं कर्मधारितं वर्णाश्रमधर्मं च पुनः पुनः वर्णयति। यद्यपि पूर्वजम्नकर्माधारेण ईश्वरेण दत्तम्। वर्णः अस्माकम् स्वकीयः प्राधान्यः गुणानुसारं स्वीकृतः च। वेदेषु जातिः

कस्मिंश्चित् धर्मे न आश्रितः। शूद्राः अपि दैवतं प्राप्य उच्चतमपीठे स्थितवन्तः इति बहु प्रमाणम् अस्ति। अतः अस्माभिः पुण्यवेदप्रकाशेन वर्णाश्रमव्यवस्थायाः निर्माणं पुस्तिकातः पीडीं यावत् कर्तव्यम्। वैदिकयुगस्य च न्यायं समतावादी अभेदसमाजं स्थापयेत्।

---

[1] निरुक्त 2/3

[2] निरुक्त 2/13

[3] यजु.वे. 18/48

[4] ऋ.वे. 5/60/5

[5] ऋ.वे 9/112/1

[6] मनु.स 1/88

[7] ऐ.ब्रा 8/6

[8] श.ब्रा 13/1/5

[9] म.सं 1/89

[10] अ.वे 3/15/1

[11] मनु.सं 1/90

[12] तै.सं 3/2

[13] म.सं 1/91

## सन्दर्भ ग्रन्थ सूची


Shastri,Chhajjuram.( 2016). Niruktam of Yāska . Meharchanda Lachmandas Publication.

Satavlekar,Sripad Damodar .(1985). Ṛgveda kā Subodhabhāṣya. Swadhyay Mandal Pardi.

Dayananda Sarasvati, Maharshi .(2010).Ṛgvedabhāṣyam. Manav Utthan Sankalpa Sansthan.

Satyaprakash, Swami. (2010). Śatapathabrāhmaṇam. Vijay Kumar Gobindaram Hasananda.

Dayānanda Sarasvatī , Maharṣi. (2010). Yajurvedabhāṣyam. Manav Utthan Sankalpa Sansthan.